# श्रीमद् भागवत रसिक कुटुंब

## नाम रामायण

जयत्याश्रितसंत्रासध्वान्विध्वंसनोदयः ।

प्रभावान् सीतया देव्या परमव्योमभास्करः ॥

### ॥ बालकाण्डः ॥

शुद्धब्रह्मपरात्पर राम ॥ 1 ॥कालात्मकपरमेश्वर राम ॥ 2 ॥

शेषतल्पसुखनिद्रित राम ॥ 3 ॥ब्रह्माद्यामरप्रार्थित राम ॥ 4 ॥

चण्डकिरणकुलमण्डन राम ॥ 5 ॥श्रीमद्दशरथ-नन्दन राम ॥ 6 ॥

कौसल्यासुखवर्धन राम ॥ 7 ॥विश्वामित्रप्रियधन राम ॥ 8 ॥

घोरताटकाघातक राम ॥ 9 ॥मारीचादिनिपातक राम ॥ 10 ॥

कौशिक-मख-संरक्षक राम ॥ 11 ॥श्रीमदहल्योद्धारक राम ॥ 12 ॥

गौतममुनिसम्पूजित राम ॥ 13 ॥सुरमुनिवरगणसंस्तुत राम ॥ 14 ॥

नाविकधावितमृदुपद राम ॥ 15 ॥मिथिलापुरजनमोहक राम ॥ 16 ॥

विदेहमानसरञ्जक राम ॥ 17 ॥त्र्यम्बक-कार्मुकभञ्जक राम ॥ 18 ॥

सीतार्पितवरमालिक राम ॥ 19 ॥कृतवैवाहिककौतुक राम ॥ 20 ॥

भार्गवदर्प-विनाशक राम ॥ 21 ॥श्रीमदयोध्यापालक राम ॥ 22 ॥

राम राम जय राजा राम । राम राम जय सीता राम ॥

### ॥ अयोध्याकाण्डः ॥

अगणितगुणगणभूषित राम ॥ 23 ॥ अवनी-तनयाकामित राम ॥ 24 ॥

राकाचन्द्रसमानन राम ॥ 25 ॥ पितृवाक्याश्रितकानन राम ॥ 26 ॥

प्रियगुहविनिवेदितपद राम ॥ 27 ॥ तत्क्षालितनिजमृदुपद राम ॥ 28 ॥

भरद्वाजमुखानन्दक राम ॥ 29 ॥ चित्रकूटाद्रिनिकेतन राम ॥ 30 ॥

दशरथसन्ततचिन्तित राम ॥ 31 ॥ कैकेयीतनयार्थित राम ॥ 32 ॥

विरचितनिजपितृकर्मक राम ॥ 33 ॥ भरतार्पितनिजपादुक राम ॥ 34 ॥

राम राम जय राजा राम । राम राम जय सीता राम ॥

## ॥ अरण्यकाण्डः ॥

दण्डक-वनजनपावन राम ॥ 35 ॥ दुष्टविराध-विनाशन राम ॥ 36 ॥

शरभङ्गसुतीक्ष्णार्चित राम ॥ 37 ॥ अगस्त्यानुग्रहवर्धित राम ॥ 38 ॥

गृध्राधिपसंसेवित राम ॥ 39 ॥ पञ्चवटीतटसुस्थित राम ॥ 40 ॥

शूर्पणखार्तिविधायक राम ॥ 41 ॥ खरदूषणमुखसूदक राम ॥ 42 ॥

सीताप्रियहरिणानुग राम ॥ 43 ॥ मारीचार्तिकृदाशुग राम ॥ 44 ॥

विनष्टसीतान्वेषक राम ॥ 45 ॥ गृध्राधिपगतिदायक राम ॥ 46 ॥

शबरीदत्तफलाशन राम ॥ 47 ॥ कबन्धबाहुच्छेदक राम ॥ 48 ॥

राम राम जय राजा राम । राम राम जय सीता राम ॥

## ॥ किष्किन्धाकाण्डः ॥

हनुमत्सेवितनिजपद राम ॥ 49 ॥नतसुग्रीवाभीष्टद राम ॥ 50 ॥

गर्वितवालिसंहारक राम ॥ 51 ॥वानरदूतप्रेषक राम ॥ 52 ॥

हितकरलक्ष्मणसंयुत राम ॥ 53 ॥

राम राम जय राजा राम ।राम राम जय सीता राम ॥

## ॥ सुन्दरकाण्डः ॥

कपिवरसन्ततसंस्मृत राम ॥ 54 ॥तद्गतिविघ्नध्वंसक राम ॥ 55 ॥

सीताप्राणाधारक राम ॥ 56 ॥दुष्टदशाननदूषित राम ॥ 57 ॥

शिष्टहनूमद्भूषित राम ॥ 58 ॥सीतावेदितकाकावन राम ॥ 59 ॥

कृतचूडामणिदर्शन राम ॥ 60 ॥कपिवरवचनाश्वासित राम ॥ 61 ॥

राम राम जय राजा राम । राम राम जय सीता राम ॥

## ॥ युद्धकाण्डः ॥

रावणनिधनप्रस्थित राम ॥ 62 ॥ वानरसैन्यसमावृत राम ॥ 63 ॥

शोषितसरिदीशार्थित राम ॥ 64 ॥ विभीषणाभयदायक राम ॥ 65 ॥

पर्वतसेतुनिबन्धक राम ॥ 66 ॥ कुम्भकर्णशिरच्छेदक राम ॥ 67 ॥

राक्षससङ्घविमर्दक राम ॥ 68 ॥ अहिमहिरावणचारण राम ॥ 69 ॥

संहृतदशमुखरावण राम ॥ 70 ॥ विधिभवमुखसुरसंस्तुत राम ॥ 71 ॥

खस्थितदशरथवीक्षित राम ॥ 72 ॥ सीतादर्शनमोदित राम ॥ 73 ॥

अभिषिक्तविभीषणनत राम ॥ 74 ॥ पुष्पकयानारोहण राम ॥ 75 ॥

भरद्वाजादिनिषेवण राम ॥ 76 ॥ भरतप्राणप्रियकर राम ॥ 77 ॥

साकेतपुरीभूषण राम ॥ 78 ॥ सकलस्वीयसमानत राम ॥ 79 ॥

रत्नलसत्पीठास्थित राम ॥ 80 ॥ पट्टाभिषेकालङ्कृत राम ॥ 81 ॥

पार्थिवकुलसम्मानित राम ॥ 82 ॥ विभीषणार्पितरङ्गक राम ॥ 83 ॥

कीशकुलानुग्रहकर राम ॥ 84 ॥ सकलजीवसंरक्षक राम ॥ 85 ॥

समस्तलोकाधारक राम ॥ 86 ॥

राम राम जय राजा राम । राम राम जय सीता राम ॥

## ॥ उत्तरकाण्डः ॥

आगतमुनिगणसंस्तुत राम ॥ 87 ॥विश्रुतदशकण्ठोद्भव राम ॥ 88 ॥

सीतालिङ्गननिर्वृत राम ॥ 89 ॥नीतिसुरक्षितजनपद राम ॥ 90 ॥

विपिनत्याजितजनकज राम ॥ 91 ॥कारितलवणासुरवध राम ॥ 92 ॥

स्वर्गतशम्बुकसंस्तुत राम ॥ 93 ॥स्वतनयकुशलवनन्दित राम ॥ 94 ॥

अश्वमेधक्रतुदीक्षित राम ॥ 95 ॥कालावेदितसुरपद राम ॥ 96 ॥

आयोध्यकजनमुक्तिद राम ॥ 97 ॥ विधिमुखविबुधानन्दक राम ॥ 98 ॥

तेजोमयनिजरूपक राम ॥ 99 ॥ संसृतिबन्धविमोचक राम ॥ 100 ॥

धर्मस्थापनतत्पर राम ॥ 101 ॥ भक्तिपरायणमुक्तिद राम ॥ 102 ॥

सर्वचराचरपालक राम ॥ 103 ॥ सर्वभवामयवारक राम ॥ 104 ॥

वैकुण्ठालयसंस्थित राम ॥ 105 ॥ नित्यानन्दपदस्थित राम ॥ 106 ॥

राम् राम् जय राजा राम ॥ 107 ॥ राम् राम् जय सीता राम ॥ 108 ॥

राम राम जय राजा राम । राम राम जय सीता राम ॥